शार्ङ्गधर संहिता

पूर्वखण्डे प्रथमोऽध्यायः

मङ्गलाचरणम्

श्रियं स दद्याद्भवतां पुरारिर्यदङ्गतेजःप्रसरे भवानी
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ १

समूलं ग्रन्थप्रयोजनम्

प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोऽनुभूताः
विधीयते शार्ङ्गधरेण तेषां सुसंग्रहः सज्जनरञ्जनाय २

रोगनिश्चयपूर्वकं चिकित्सा

हेत्वादिरूपाकृतिसात्म्यजातिभेदैः समीक्ष्यातुरसर्वरोगान्
चिकित्सितं कर्षणबृंहणाख्यं कुर्वीत वैद्यो विधिवत्सुयोगः ३

ओषधिप्रभावाः

दिव्यौषधीनां बहवः प्रभेदा वृन्दारकाणामिव विस्फुरन्ति
ज्ञात्वेति संदेहमपास्य धीरैः संभावनीया विविधप्रभावाः ४

ग्रन्थप्रयोजनम्

स्वाभाविकागन्तुककायिकान्तरा रोगा भवेयुः किल कर्मदोषजाः
तच्छेदनार्थं दुरितापहारिणः श्रेयोमयान्योगवरान्नियोजयेत् ५

ग्रन्थमाहात्म्यम्

प्रयोगानागमात्सिद्धान्प्रत्यक्षादनुमानतः
सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरात् ६

पूर्वखण्डाध्यायानुक्रमः

प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा
नाडीपरीक्षाऽदिविधिस्ततोदीपनपाचनम् ७

ततः कलाऽदिकाख्यानमाहारादिगतिस्तथा
रोगाणां गणना चैव पूर्वखण्डोऽयमीरितः ८

मध्यमखण्डाध्यायानुक्रमः
स्वरसः क्वाथफाण्टौ च हिमः कल्कश्च चूर्णकम्
तथैव गुटिकालेहौ स्नेहाः संधानमेव च
धातुशुद्धी रसाश्चैव खण्डोऽय मध्यमः स्मृतः ९

उत्तरखण्डाध्यायानुक्रमः
स्नेहपानं स्वेदविधिर्वमनं च विरेचनम्
ततस्तु स्नेहबस्तिः स्यात्ततश्चापि निरूहणम् १०

ततश्चाप्युत्तरो बस्तिस्ततो नस्यविधिर्मतः
धूमपानविधिश्चैव गण्डूषादिविधिस्तथा ११

लेपादीनां विधिः ख्यातस्तथा शोणितविस्रुतिः
नेत्रकर्मप्रकारश्च खण्डः स्यादुत्तरस्त्वयम् १२

ग्रन्थसंख्या
द्वात्रिंशत्संमिताध्याययुक्तेयं संहिता स्मृता
षड्विंशतिशतान्यत्र श्लोकानां गणितानि च १३

मानस्यावश्यकता
न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया १४

मागधमानपरिभाषा
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः
त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते १५

परमाणोर्वंश्याश्च लक्षणम्

जिालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः
तस्य त्रिंशत्तमो भागः परमाणुः स कथ्यते १६

जालान्तरगतैः सूर्यकरेर्वंशी विलोक्यते १७

मरीचिप्रभृतिसंज्ञाः
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिस्तु राजिका
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः १८

यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यकौ १९

शाणकोलसंज्ञे
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते २०

कर्षस्तत्पर्यायाश्च
कोलद्वयं च कर्षः स्यात्स प्रोक्तः पाणिमानिका २१

अक्षं पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्
विडालपदकं चैव तथा षोडशिका मता २२

करमध्यो हंसपदं सुवर्णं कवलग्रहः
उदुम्बरं च पर्यायैः कर्ष एव निगद्यते २३

अर्द्धपलपल संज्ञे
स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा
शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते २४

प्रसृतिकुडवादिशरावसंज्ञा
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते
प्रसृतिभ्यामञ्जलि स्यात्कुडवोऽद्धशरावकः २५

अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः २६

प्रस्थाढकसंज्ञे
शरावाभ्यां भवेत्प्रस्थश्चतुः प्रस्थैस्तथाऽढकम्
भाजनं कंसपात्रं च चतुःषष्टिपलं च तत् २७

द्रोणद्रोणीसंज्ञे
चतुर्भिराढकैर्द्रोणः कलशो नल्वणार्मणौ
उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञकाः २८

द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः
शूर्पाभ्यां च भवेद् द्रोणी वाही गोणी च सा स्मृता २९

खारीसंज्ञा
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः
चतुःसहस्रपलिका षराणवत्यधिका च सा ३०

भारतुलासंज्ञे
पलानां द्विसहस्त्रं च भार एकः प्रकीर्त्तितः
तुला पलशतं ज्ञेया सर्वत्रैवैष निश्चयः ३१

यथोत्तरचतुर्गुणमाषादयः
माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकम्
राशिर्गोणीः खारिकेति यथोत्तरचतुर्गुणाः ३२

द्रवार्द्रशुष्कद्रव्याणामनुक्तमानपरिभाषा

गुञ्जाऽदिमानमारभ्य यावत्स्यात्कुडवस्थितिः
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ३३

द्रवार्द्रयोर्द्विगुणग्रहणार्थं परिभाषा
प्रस्थादिमानमारभ्य द्विगुणं तत् द्रवार्द्रयोः
मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतम् ३४

द्रवमानार्थकुडवपात्रनिर्माणप्रकारः
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्
विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत् ३५

योगपरिभाषा
यदौषधं तु प्रथमं यस्य योगस्य कथ्यते
तन्नाम्नैव स योगो हि कथ्यतेऽत्र विनिश्चयः ३६

मात्रापरिभाषा
स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम्
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ३७

कालिङ्गमानकल्पनायां हेतवः
यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ
अतस्तु मात्रा तद्योग्या प्रोच्यते सुज्ञसंमता ३८

कालिङ्गमानम्
यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः ३९

यवद्वयेन गुञ्जा स्यात् त्रिगुञ्जो वल्ल उच्यते
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचित् ४०

स्याच्चतुर्माषकः शाणः स निष्कष्टङ्क एव च
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषकः ४१

चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः
चतुष्पलैश्च कुडवं प्रस्थाद्याः पूर्ववन्मताः ४२

मानस्य द्वैविध्यम्
कालिङ्गं मागधं चैव द्विविधं मानमुच्यते
कालिङ्गान्मागधं श्रेष्ठं मानं मानविदो विदुः ४३

औषधपरिभाषौ तत्र द्रव्याणां युक्तायुक्तविचारः
नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु
विना विडङ्गकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः ४४

सदार्द्राण्यद्विगुणानि द्रव्याणि
गुडूची कुटजो वासा कूष्माण्डश्च शतावरी
अश्वगन्धा सहचरी शतपुष्पा प्रसारिणी ४५

प्रयोक्तव्या सदैवार्द्रा द्विगुणा नैव कारयेत् ४६

नूतनद्रव्यस्य प्राधान्यम्
शुष्कं नवीनं यद् द्रव्यं योज्यं सकलकर्मसु
आर्द्रं च द्विगुणं युंज्यादेष सर्वत्र निश्चयः ४७

अनुक्तावस्थायां परिभाषाविधिः
कालेऽनुक्ते प्रभातं स्यादङ्गेऽनुक्ते जटा भवेत्
भागेऽनुक्ते तु साम्यं स्यात्पात्रेऽनुक्ते च मृण्मयम्
द्रवेऽनुक्ते जलं ग्राह्यं तैलेऽनुक्ते तिलोद्भवम् ४८

पुनरुक्तद्रव्यमानव्यवस्था
एकमप्यौषधं योगे यस्मिन्यत्पुनरुच्यते
मानतो द्विगुणं प्रोक्तं तद् द्रव्यं तत्त्वदर्शिभिः ४९

रक्तश्वेतचन्दनादिव्यवस्था

चूर्णस्नेहासवा लेहाः प्रायशश्चन्दनान्विताः
कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ५०

प्रसिद्धद्रव्याणां कालातिक्रमेण हीनगुणत्वम्
गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम्
मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुयात् ५१

हीनत्वं गुटिकालेहौ लभेते वत्सरात्परम्
हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्तथा ५२

ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परम्
पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ५३

रोगानुसारियुक्तायुक्तद्रव्यविचारः
व्याधेरयुक्तं यद् द्रव्यं गणोक्तमपि तत्त्यजेत्
अनुक्तमपि यद्युक्तं योजयेत्तत्र तद् बुधः ५४

द्रव्येषु स्थानभेदेन गुणभेदः
आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिर्मतः
अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः
अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च ५५

द्रव्याणां ग्रहणविधिः
गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे ५६

आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि
साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितम् ५७

कुत्सितस्थानोद्भवद्रव्याणां परित्यागः
वल्मीककुत्सितानूपश्मशानोषरमार्गजाः
जन्तुवह्निहिमव्याप्ता नौषध्यः कार्यसिद्धिदाः ५८

कार्यभेदेन द्रव्यग्रहणे ऋतुविशेषः
शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधम्
विरेकवमनार्थं च वसन्तान्ते समाहरेत् ५९

अनुक्तावयवद्रव्याणां ग्रहणेऽङ्गविचारः
अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचो बुधैः
गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ६०

न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद्बीजकादितः
तालीसादेश्च पत्राणि फलं स्यात्त्रिफलादितः
धातक्यादेश्च पुष्पाणि स्नुह्यादेः क्षीरमाहरेत् ६१

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे परिभाषाकथनं नाम प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

औषधभक्षणार्हकालस्य सामान्यनिर्देशः
भैषज्यमभ्यवहरेत्प्रभाते प्रायशो बुधः
कषायांश्च विशेषेण तत्र भेदस्तु दर्शितः १

औषधभक्षणे पञ्चविधकालनिर्देशः
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्
किंचित्सूर्योदये जाते तथा दिवसभोजने २

सायन्तने भोजने च मुहुश्चापि तथा निशि ३

तत्र प्रथमः कालः
प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः
लेखनार्थं च भैषज्यं प्रभाते तत्समाहरेत्
एवं स्यात् प्रथमः कालो भैषज्यग्रहणे नृणाम् ४

द्वितीयः कालः

भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते
अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ५

समानवाते विगुणे मन्देऽग्नावग्निदीपनम्
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ६

व्यानकोपे च भैषज्यं भोजनान्ते समाहरेत्
हिक्काऽक्षेपककम्पेषु पूर्वमन्ते च भोजनात् ७

एवं द्वितीयकालश्च प्रोक्तो भैषज्यकर्मणि ८

तृतीयः कालः
उदाने कुपिते वाते स्वरभङ्गादिकारिणि
ग्रासे ग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने
प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते च दीयते
औषधं प्रायशो धीरैः कालोऽय स्यात्तृतीयकः १०

चतुर्थः कालः
मुहुर्मुहुश्च तृट्च्छर्दिहिक्काश्वासगरेषु च
सान्नं च भेषजं दद्यादितिकालश्चतुर्थकः ११

पञ्चमः कालः
ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा
पाचनं शमनं देयमनन्नं भेषजं निशि
इति पञ्चमकालः स्यात् प्रोक्तो भैषज्यकर्मणि १२

द्रव्ये रसादयः पञ्चावस्थाः
द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च
संबन्धेन क्रमादेताः पञ्चावस्थाः प्रकीर्त्तिताः १३

तत्र रसः

मधुरोऽम्ल पटुश्चैव कटुतिक्तकषायकाः
इत्येते षड्रसाः ख्याता नानाद्रव्यसमाश्रिताः १४

मधुरादिरसोत्पत्तिः
धराऽम्बुद्मऽनलजलज्वलनाकाशमारुतैः
वाय्वग्निद्मऽनिलैभूर्तद्वयै रसभवः क्रमात् १५

गुणाः
गुरुः स्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात्
धराऽम्बुवह्निपवनव्योम्नां प्रायो गुणाः स्मृताः १६

एष्वेवान्तर्भवन्त्यन्ये गुणेषु गुणसंचयाः १७

वीर्यम्
वीर्यमुष्णं तथा शीतं प्रायशो द्रव्यसंश्रयम्
तत्सर्वमग्नीषोमीयं दृश्यते भुवनत्रये
अत्रैवान्तर्भविष्यन्ति वीर्याण्यन्यानि यान्यपि १८

विपाकः
त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः
मिष्टः पटुश्च मधुरमम्लोऽम्ल पच्यते रसः १९

कषायकटुतिक्तानां पाकः स्यात्प्रायशः कटुः
मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते २०

कटुकाज्जायते वायुः कर्माणीति विपाकतः २१

प्रभावः
प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः
समाऽपि कुरुते दोषत्रितयस्य विनाशनम् २२

क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्प्रभावतः
ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा २३

रसवीर्यादीनां पृथक् पृथक् प्रभावः
क्वचिद्रसो गुणो वीर्यं विपाकः शक्तिरेव च
कर्म स्वं स्वं प्रकुर्वन्ति द्रव्यमाश्रित्य ये स्थिताः २४

ऋतुभेदेन वातादीनां संचयकोपोपशमाः
चयकोपशमा यस्मिन्दोषाणां सम्भवन्ति हि
ऋतुषट्कं तदाख्यातं रवे राशिषु संक्रमात् २५

राशिक्रमेण ऋतुषट्कनिर्देशः
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृगिमथुनकर्कयोः
सिंहकन्ये स्मृता वर्षास्तुलावृश्चिकयोः शरत्
धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः २६

वातादिदोषत्रयस्य चयकोपशमाः
ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति
वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति २७

हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति
प्रायेण प्रशमं याति स्वयमेव समीरणः २८

शरत्काले वसन्ते च पित्तं प्रावृडृतौ कफः २९

यमदंष्ट्रासमयनिर्देशः
कार्त्तिकस्य दिनान्यष्टावष्टावाग्रयणस्य च
यमदंष्ट्रा समाख्याता स्वल्पभुक्तो हि जीवति ३०

दोषाणामकालेऽपि भोजनादिना चयकोपापचयाः
चयकोपशमा दोषा विहाराहारसेवनैः

समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययम् ३१

वायोः प्रकोपशमहेतवः
लघुरूक्षमिताहारादतिशीताच्छ्रमात्तथा
प्रदोषे कामशोकाभ्यां भीचिन्तारात्रिजागरैः ३२

अभिघातादपां गाहाज्जीर्णेऽन्ने धातुसंक्षयात्
वायुः प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ३३

पित्तस्य प्रकोपशमहेतवः
विदाहिकटुकाम्लोष्णभोज्यैरत्युष्णसेवनात्
मध्याह्ने क्षुत्तृषारोधाज्जीर्यत्यन्नेऽर्द्धरात्रके
पित्तं प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ३४

कफस्य प्रकोपशमहेतवः
मधुरस्निग्धशीतादिभोज्यैर्दिवसनिद्रया
मन्देऽग्नौ च प्रभाते च भुक्तमात्रे तथाऽश्रमात्
श्लेष्मा प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ३६

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे भैषज्याख्यानकं नाम द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

नाडीपरीक्षाविधिः
करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी
तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः १

प्रकुपितवातजनाडीलक्षणम्
नाडी धत्ते मरुत्कोपे जलौकासर्पयोर्गतिम् २

प्रकुपितपित्तजनाडीलक्षणम्
कुलिङ्गकाकमण्डूकगतिं पित्तस्य कोपतः ३

प्रकुपितकफजनाडीलक्षणम्
हंसपारावतगतिं धत्ते श्लेष्मप्रकोपतः ४

सन्निपातजनाडीलक्षणम्
लावतित्तिरवर्त्तीनां गमनं सन्निपाततः ५

द्विदोषजनाडीलक्षणम्
कदाचिन्मन्दगमना कदाचिद्वेगवाहिनी द्विदोषकोपतो ज्ञेया ६

असाध्यनाडीलक्षणम्
हन्ति च स्थानविच्युता
स्थित्वा स्थित्वा चलति या सा स्मृता प्राणनाशिनी
अतिक्षीणा च शीता च जीवितं हन्त्यसंशयम् ७

ज्वरे नाडीलक्षणम्
ज्वरकोपे तु धमनी सोष्णा वेगवती भवेत् ८

कामक्रोधचिन्ताभययुक्तानां नाडीलक्षणानि
कामक्रोधोद्वेगवहा क्षीणा चिन्ताभयप्लुता ९

मन्दाग्नि धातुक्षयरक्तप्रकोपसामावस्थासु नाडीलक्षणानि
मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत्
असृक्पूर्णा भवेत्कोष्णा गुर्वी सामा गरीयसी १०

दीप्ताग्नि सुखितक्षुधित तृप्तपुरुषाणां नाडीलक्षणानि
लघ्वी वहति दीप्ताग्नेस्तथा वेगवती मता
सुखितस्य स्थिरा ज्ञेया तथा बलवती स्मृता
चपला क्षुधितस्य स्यात्तृप्तस्य वहति स्थिरा ११

दूतपरीक्षा
दूताः स्वजातयोऽव्यङ्गाः पटवो निर्मलाम्बराः

सुखिनोऽश्ववृषारूढाः शुभ्रपुष्पफलैर्युताः
सुजातयः सुचेष्टाश्च सजीवदिशि संश्रिताः
भिषजं समये प्राप्ता रोगिणः सुखहेतवे १२

यिस्यां प्राणमरुद्वाति सा नाडी जीवसंयुता
दूतस्य शकुनानि
वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते
न शुभं सौम्यशकुनं प्रदीप्तं च सुखावहम् १३

वैद्यस्य शकुनानि
चिकित्सां रोगिणः कर्तुं गच्छतो भिषजः शुभम्
यात्रेयं सौम्यशकुनं प्रोक्तं दीप्तं न शोभनम् १४

चिकित्स्यलक्षणम्
निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन संयुतः
चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेन्द्रियः १५

अथ शुभाशुभस्वप्नपरीक्षा
तत्र दुःस्वप्नलक्षणानि
स्वप्नेषु नग्नान्मुण्डांश्च रक्तकृष्णाम्बरावृतान्
व्यङ्गांश्च विकृतान्कृष्णान्सपाशान्सायुधानपि
बध्नतो निघ्नतश्चापि दक्षिणां दिशमाश्रितान्
महिषोष्ट्रखरारूढान्स्त्रीपुंसो यस्तु पश्यति
स स्वस्थो लभते व्याधिं रोगी यात्येव पञ्चताम् १६

अन्यान्यपि दुःस्वप्नलक्षणानि
अधो यो निपतत्युच्चाज्जलेऽग्नौ वा विलीयते
श्वापदैर्हन्यते योऽपि मत्स्याद्यैर्गिलितो भवेत् १७

यस्य नेत्रे विलीयेते दीपो निर्वाणतां व्रजेत्
तैलं सुरां पिबेद्वाऽपि लोहं वा लभते तिलान् १८

पक्वान्नं लभतेऽश्नाति विशेत्कूपं रसातलम्
स स्वस्थो लभते रोगं रोगी यात्येव पञ्चताम् १९

दुःस्वप्नदर्शने करणीयविधिः
दुःस्वप्नानेवमादींश्च दृष्ट्वा ब्रूयान्न कस्यचित्
स्नानं कुर्यादुषस्येव दद्याद्धेमतिलानयः २०

पठेत्स्तोत्राणि देवानां रात्रौ देवालये वसेत्
कृत्वैवंत्रिदिनं मर्त्यो दुःस्वप्नात्परिमुच्यते २१

शुभस्वप्नलक्षणानि
स्वप्नेषु यः सुरान्भूपाञ्जीवतः सुहृदो द्विजान्
गोसमिद्धाग्नितीर्थानि पश्येत्सुखमवाप्नुयात् २२

अन्यच्च
तीर्त्वा कलुषनीराणि जित्वा शत्रुगणानपि
आरुह्य सौधगोशैलकरिवाहान्सुखी भवेत् २३

अन्यच्च
शुभ्रपुष्पाणि वासांसि मांसमत्स्यफलानि च
प्राप्यातुरः सुखी भूयात्स्वस्थो धनमवाप्नुयात् २४

अन्यच्च
अगम्यागमनं लेपो विष्ठया रुदितं मृतिः
आममांसाशनं स्वप्ने धनारोग्याप्तये विदुः २५

अन्यच्च
जलौका भ्रमरी सर्पो मक्षिका वाऽपि यं दशेत्
रोगी स भूयादुल्लाघः स्वस्थो धनमवाप्नुयात् २६

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे नाडीपरीक्षादिविधिर्नामतृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः
तत्र दीपनपाचनादिकथनम्
तत्र दीपनद्रव्यलक्षणम्
पचेन्नामं वह्निकृच्च दीपनं तद्यथा मिशिः १

पाचनदीपनपाचनद्रव्ययोर्लक्षणे
पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनम्
नागकेशरवद्विद्याच्चित्रो दीपनपाचनः २

संशमनद्रव्यलक्षणम्
न शोधयति न द्वेष्टि समान्दोषांस्तथोद्धतान्
समीकरोति विषमाञ्शमनं तद्यथामृता ३

अनुलोमनद्रव्यलक्षणम्
कृत्वा पाकं मलानां यद्भित्त्वा बन्धमधो नयेत्
तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ४

स्रंसनद्रव्यलक्षणम्
पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकम्
नयत्यधः स्रंसनं तद्यथा स्यात् कृतमालकः ५

भेदनद्रव्यलक्षणम्
मलादिकमबद्धं यद्बद्धं वा पिण्डितं मलैः
भित्त्वाऽध पातयति यद् भेदनं कटुकी यथा ६

रेचनद्रव्यलक्षणम्
विपक्वं यदपक्वं वा मलादि द्रवतां नयेत्
रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा ७

वमनद्रव्यलक्षणम्
अपक्वपित्तश्लेष्माणौ बलादूर्ध्वं नयेत्तु यत्

वमनं तद्धि विज्ञेयं मदनस्य फलं यथा ८

शोधनद्रव्यलक्षणम्
स्थानाद् बहिर्नयेदूर्ध्वमधो वा मलसंचयम्
देहसंशोधनं तत्स्याद् देवदालीफलं यथा ९

छेदनद्रव्यलक्षणम्
श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद्बलात्
छेदनं तद्यथा क्षारा मरिचानि शिलाजतु १०

लेखनद्रव्यलक्षणम्
धातून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत्
लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः ११

ग्राहिद्रव्यलक्षणम्
दीपनं पाचनं यत्स्यादुष्णत्वाद् द्रवशोषकम्
ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली १२

स्तम्भनद्रव्यलक्षणम्
रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत्
वातकृत्स्तम्भनं तत्स्याद्यथा वत्सकटुण्टुकौ १३

रसायनद्रव्यलक्षणम्
रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशनम्
यथाऽमृता रुदन्ती च गुग्गुलुश्च हरीतकी १४

वाजीकरद्रव्यलक्षणम्
यस्माद् द्रव्याद्भवेत्स्त्रीषु हर्षो वाजीकरं च तत्
यथा नागबलाऽद्या स्युर्बीजं च कपिकच्छुजम् १५

वीर्यवर्द्धकद्रव्यलक्षणम्

यस्माच्छुक्रस्य वृद्धिः स्याच्छुकलं हि तदुच्यते
यथाऽश्वगन्धा मुसली शर्करा च शतावरी १६

श्रुकस्य जनकानि रेचकानि च द्रव्याणि
दुग्धं माषाश्च भल्लातफलमज्जाऽमलानि च
प्रवर्त्तकानि कथ्यन्ते जनकानि च रेतसः १७

वाजीकरद्रव्याणां विशेषः
प्रवर्त्तनी स्त्री शुक्रस्य रेचनं बृहतीफलम्
जातीफलं स्तम्भकं च शोषणी च हरीतकी १८

सूक्ष्मद्रव्यलक्षणम्
देहस्य सूक्ष्मच्छिद्रेषु विशेद्यत्सूक्ष्ममुच्यते
तद्यथा सैन्धवं क्षौद्रं निम्बतैलं रुबूद्भवम् १९

व्यवायिद्रव्यलक्षणम्
पूर्वं व्याप्याखिलं कायं ततः पाकं च गच्छति
व्यवायि तद्यथा भङ्गा फेनं चाहिसमुद्भवम् २०

विकाशिद्रव्यलक्षणम्
सन्धिबन्धांस्तु शिथिलान्यत्करोति विकाशि तत्
विश्लेष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवाः २१

मदकारिद्रव्यलक्षणम्
बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते
तमोगुणप्रधानं च यथा मद्यसुराऽदिकम् २२

प्राणहरद्रव्यलक्षणम्
व्यवायि च विकाशि स्यात्सूक्ष्मं छेदि मदावहम्
आग्नेयं जीवितहरं योगवाहि स्मृतं विषम् २३

प्रमाथिद्रव्यलक्षणम्
निजवीर्येण यद् द्रव्यं स्रोतोभ्यो दोषसञ्चयम्
निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा २४

अभिष्यन्दिद्रव्यलक्षणम्
पैच्छिल्याद्गौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः
धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि २५

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे दीपनपाचनादिकथनं नाम
चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

तत्र कलादिकाख्यानम् शिरीरम्
कलादिकाख्यानम्
कलाः सप्ताशयाः सप्त धातवःसप्त तन्मलाः
सप्तोपधातवः सप्त त्वचः सप्त प्रकीर्त्तिताः १

त्रयो दोषा नवशतं स्नायूनां सन्धयस्तथा
दशाधिकं च द्विशतमस्थ्नां च त्रिशतं तथा २

सप्तोत्तरं मर्मशतं शिराः सप्तशतं तथा
चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः ३

मांसपेश्यः समाख्याता नृणां पञ्चशतं बुधैः
स्त्रीणां च विंशत्यधिकाः कण्डराश्चैव षोडश ४

नृदेहे दश रन्ध्राणि नारीदेहे त्रयोदश
एतत्समासतः प्रोक्तं विस्तरेणाधुनोच्यते ५

अथ सप्त कलाः
मांसासृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका

पञ्चमी च तथाऽन्त्राणां षष्ठी चाग्निधरा मता
रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ६

अथ सप्ताशयाः
श्लेष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः ७

ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः
तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः ८

मलाशयस्त्वधस्तस्माद् बस्तिर्मूत्राशयस्त्वधः
जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयस्त्वमी ९

नारीणां विशेषाशयाः
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः
धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ १०

अथ सप्तधातूनां नामानि तदुत्पत्तिक्रमश्च
रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः
जायन्तेऽन्योऽन्यतः सर्वे पाचिताः पित्ततेजसा ११

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते
मेदसोऽस्थि ततो मज्जा मज्जायाः शुक्रसंभवः १२

अथ सप्तधातूनां मलास्तदुत्पत्तिक्रमश्च
जिह्वानेत्रकपोलानां जलं पित्तं च रञ्जकम्
कर्णविड्रसनादन्तकक्षामेढ्रादिजं मलम् १३

नखनेत्रमलं वक्त्रे स्निग्धत्वं पिटिकास्तथा
जायन्ते सप्तधातूनां मलान्येतान्यनुक्रमात् १४

मतान्तरेण धातुमलाः

कफः पित्तं मलं खेषु प्रस्वेदो नखरोम च
नेत्रविट् त्वक्षु च स्नेहो धातूनां क्रमशो मलाः १५

अथोपधातवः
स्तन्यं रजश्च नारीणां काले भवति गच्छति
शुद्धमांसभवः स्नेहः सा वसा परिकीर्त्तिता १६

स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम्
इति धातुभवा ज्ञेया एते सप्तोपधातवः १७

अथौजोलक्षणम्
ओजः सर्वशरीरस्थं शीतं स्निग्धं स्थिरं मतम्
सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् १८

अथ सप्त त्वचः
ज्ञेयाऽवभासिनी पूर्वं सिध्मस्थानं च सा मता
द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः १९

श्वेता तृतीया संख्याता स्थानं चर्मदलस्य सा
ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका २०

पञ्चमी वेदनी ख्याता सर्वकुष्ठोद्भवस्ततः
विख्याता रोहिणी षष्ठी ग्रन्थिगण्डापचीस्थितिः २१

स्थूला त्वक्सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा
इति सप्त त्वचः प्रोक्ताः स्थूला व्रीहिद्विमात्रया २२

अथ दोषास्तन्नामानि च
वायुः पित्तं कफो दोषा धातवश्च मलास्तथा
तत्रापि पञ्चधा ख्याताः प्रत्येकं देहधारणात् २३

दोषाणां नामान्तरे कारणनिर्देशः
शरीरदूषणाद्दोषा धातवो देहधारणात्
वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः २४

तत्र वायोः प्राधान्यं तत्कार्यवर्णनञ्च
पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् २५

पवनस्तेषु बलवान्विभागकरणान्मतः
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः २६

कार्यभेदेन वायोः पञ्चविधत्वम्
मलाशये चरेत्कोष्ठे वह्निस्थाने तथा हृदि
कण्ठे सर्वाङ्गदेशेषु वायुः पञ्चप्रकारतः २७

वायोः पञ्च नामानि
अपानः स्यात्समानश्च प्राणोदानौ तथैव च
व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात् २८

पित्तस्य विवरणम्
पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्
कटु तिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत् २९

तस्य स्थानानि कार्याणि नामानि च
अग्न्याशये भवेत्पित्तमग्निरूपं तिलोन्मितम्
त्वचि कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकम् ३०

दृश्यं यकृति यत्पित्तं तद्रसं शोणितं नयेत्
यत्पित्तं नेत्रयुगले रूपदर्शनकारि तत्
यत्पित्तं हृदये तिष्ठेन्मेधाप्रज्ञाकरं च तत्
पाचकं भ्राजकं चैव रञ्जकालोचके तथा

साधकं चेति पञ्चैव पित्तनामान्यनुक्रमात् ३२

कफस्य विवरणं कर्माणि च
कफः स्निग्धो गुरुः श्वेतः पिच्छिलः शीतलस्तथा
तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ३३

कफस्य स्थाननामकथनम्
कफश्चामाशये मूर्ध्नि कण्ठे हृदि च संधिषु
तिष्ठन्करोति देहस्य स्थैर्यं सर्वाङ्गपाटवम् ३४

क्लेदनः स्नेहनश्चैव रसनश्चावलम्बनः
श्लेष्मकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ३५

स्नायोर्विवरणम्
स्नायवो बन्धनं प्रोक्ता देहे मांसास्थिमेदसाम् ३६

सन्धेर्विवरणम्
सन्धयश्चाङ्गसन्धानाद्देहे प्रोक्ताः कफान्विताः ३७

अस्थ्नो विवरणम्
आधारश्च तथा सारः कायेऽस्थीनि बुधा विदुः ३८

मर्मणो विवरणम्
मर्माणि जीवाधाराणि प्रायेण मुनयो जगुः ३९

शिराविवरणम्
सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः ४०

धमनीविवरणम्
धमन्यो रसवाहिन्यो धमन्ति पवनं तनौ ४१

मांसपेशीविवरणम्
मांसपेश्यो बलाय स्युरवष्टम्भाय देहिनाम् ४२

कराडराविवरणम्
प्रसारणाकुञ्चनयोरङ्गानां कराडरा मताः ४३

रन्ध्रविवरणम्
नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते
मेहनापानवक्त्राणामेकैकं रन्ध्रमुच्यते
दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः
स्त्रीणां त्रीरयधिकानि स्युः स्तनयोर्गर्भवर्त्मनः
सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनाम् ४४

फुफ्फुसप्लीहयकृतां विवरणम्
तद्वामे फुफ्फुसं प्लीहा दक्षिणे च यकृन्मतम्
उदानवायोराधारः फुफ्फुसं प्रोच्यते बुधैः
रक्तवाहिशिरामूलं प्लीहा ख्याता महर्षिभिः
यकृद्रञ्जकपित्तस्य स्थानं रक्तस्य संश्रयः ४५

तिल क्लोमा वर्णनम्
जलवाहिशिरामूलं तृष्णाऽच्छादनकं तिलम् ४६

वृक्कवर्णनम्
वृक्कौ तुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः ४७

वृषणलिङ्गयोर्वर्णनम्
वीर्यवाहिशिराधारौ वृषणौ पौरुषावहौ
गर्भाधानकरं लिङ्गमयनं वीर्यमूत्रयोः ४८

हृदयवर्णनम्
हृदयं चेतनास्थानमोजसश्चाश्रयो मतम् ४९

शरीरपोषणव्यापारनिर्देशः
शिरा धमन्यो नाभिस्थाः सर्वा व्याप्य स्थितास्तनुम्
पुष्णन्ति चानिशं वायोः संयोगात्सर्वधातुभिः ५०

प्राणवायोः शरीरव्यापारनिर्देशः
नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम्
कण्ठाद्बहिर्विनिर्याति पातुं विष्णुपदामृतम्
पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः
प्रीणयन्देहमखिलं जीवयञ्जठरानलम् ५१

आयुषो मृत्योश्च स्वरूपम्
शरीरप्राणयोरेवं संयोगादायुरुच्यते
कालेन तद्वियोगाच्च पञ्चत्वं कथ्यते बुधैः ५२

तत्र वैद्यानां कृते कर्त्तव्यकर्मोपदेशः
न जन्तुः कश्चिदमरः पृथिव्यां जायते क्वचित्
अतो मृत्युरवार्यः स्यात्किन्तु रोगान्निवारयेत् ५३

रोगनिवारणे साध्यादिभेदनिर्देशः
याप्यत्वं याति साध्यस्तु याप्यो गच्छत्यसाध्यताम्
जीवितं हन्त्यसाध्यस्तु नरस्याप्रतिकारिणः ५४

धर्मादिसाधनतनो रक्षानिर्देशः
धर्मार्थकाममोक्षाणां शरीरं साधनं यतः
अतो रुग्भ्यस्तनुं रक्षेन्नरः कर्मविपाकवित्
दोषाणां साम्यस्य वैषम्यस्य च फलम्
धातवस्तन्मला दोषा नाशयन्त्यसमास्तनुम्
समाः सुखाय विज्ञेया बलायोपचयाय च ५६

सृष्टिक्रमः
जगद्योनेरनिच्छस्य चिदानन्दैकरूपिणः

पुंसोऽस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः ५७

प्रकृतिपुरुषयोगेन सृष्ट्युत्पत्तिनिर्देशः
अचेतनाऽपि चैतन्ययोगेन परमात्मनः
अकरोद्विश्वमखिलमनित्यं नाटकाकृति ५८

बुद्धिसत्त्वाहङ्कारयोरुत्पत्तिनिर्देशः
प्रकृतिर्विश्वजननी पूर्वं बुद्धिमजीजनत्
इच्छामयीं महद्रूपामहङ्कारस्ततोऽभवत्
त्रिविधः सोऽपि सञ्जातो रजः सत्त्वतमोगुणैः ५९

त्रिगुणात्मकाहङ्कारस्य कार्याणि
तस्मात्सत्त्वरजोयुक्तादिन्द्रियाणि दशाभवन्
मनश्च जातं तान्याहुः श्रोत्रत्वङ्नयनं तथा ६०

जिह्वाघ्राणवचोहस्तपादोपस्थगुदानि च
पञ्च बुद्धीन्द्रियाणयाहुः प्राक्तनानीतराणि च
कर्मेन्द्रियाणि पञ्च्व कथ्यन्ते सूक्ष्मबुद्धिभिः ६१

तन्मात्रपञ्चकोत्पत्तिनिर्देशः
तमः सत्त्वगुणोत्कृष्टादहङ्कारादथाभवत्
तन्मात्रपञ्चकं तस्य नामान्युक्तानि सूरिभिः
शब्दतन्मात्रकं स्पर्शतन्मात्रं रूपमात्रकम्
रसतन्मात्रकं गन्धतन्मात्रं चेति तद्विदुः ६२

भूतपञ्चकस्योत्पत्तिनामनिर्देशः
तन्मात्रपञ्चकात्तस्मात्संजातं भूतपञ्चकम्
व्योमानिलानलजलक्षोणीरूपं च तन्मतम् ६३

तन्मात्राणां विशेषाः
शब्दः स्पर्शश्च रूपं च रसगन्धावनुक्रमात्

तन्मात्राणां विशेषाः स्युः स्थूलभावमुपागताः ६४

इन्द्रियाणां विषयाः
बुद्धीन्द्रियाणां पञ्चैव शब्दाद्या विषया मताः ६५

कर्मेन्द्रियाणां विषया भाषादानविहारिताः
आनन्दोत्सर्गकौ चैव कथितास्तत्त्वदर्शिभिः ६६

चतुर्विंशतितत्त्ववर्णनम्
तत्र प्रथमतत्त्वस्य प्रकृतेर्नामनिर्देशः
प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा
एतानि तस्या नामानि शिवमाश्रित्य या स्थिता ६७

प्रकृतिविकृतिसंज्ञकस्य तत्त्वसप्तकस्य निर्देशः
महानहङ्कृतिः पञ्चतन्मात्राणि पृथक्पृथक्
प्रकृतिर्विकृतिश्चैव सप्तैतानि बुधा जगुः ६८

दशेन्द्रियाणि चित्तं च महाभूतानि पञ्च च
विकाराः षोडश ज्ञेयाः सर्वं व्याप्य जगत्स्थिताः ६९

जीवस्वरूपनिर्देशः
एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे
जीवात्मा नियतो नित्यो वसति स्वान्तदूतवान् ७०

स देही कथ्यते पापपुण्यदुःखसुखादिभिः
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्मबन्धनैः ७१

देहिनो बन्धनानि
कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः
दशेन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः ७२

जीवस्य बन्धमोक्षयोर्दुःखसुखयोर्निर्देशः
आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते
तद्दुःखयोगकृद्व्याधिरारोग्यं तत्सुखावहम् ७३

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे कलादिकाख्यानं नाम पञ्चमोऽध्यायः

अथ षष्ठोऽध्यायः

तत्र आहारादिगतिकथनम्
आहारस्य पाकक्रमनिर्देशः
यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः
माधुर्यं फेनभावं च षड्रसोऽपि लभेत सः १

आहारस्याम्लभाव ग्रहणीनयन कटुभावानां निर्देशः
अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेत्
ततः समानमरुता ग्रहणीमभिनीयते
ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुः २

आहारस्य रसामावस्थयोनिर्देशः
रसो भवति संपक्वादपक्वादामसंभवः ३

परिपक्वस्य रसस्य कार्याणि
वह्नेर्बलेन माधुर्यं स्निग्धतां याति तद्रसः
पुष्णाति धातूनखिलान्सम्यक्पक्वोऽमृतोपमः ४

आमरसस्य कार्याणि
मन्दबह्निविदग्धश्च कटुश्चाम्लो भवेद्रसः
विषभावं व्रजेद्वाऽपि कुर्याद्वा रोगसंकरम् ५

आहारस्य सारमलपदार्थयोर्निर्देशादिकम्
आहारस्य रसः सारः सारहीनो मलद्रवः
शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् ६

तत्किट्टं च मलं ज्ञेयं तिष्ठेत्पक्वाशये च तत्
वलित्रितयमार्गेण यात्यपानेन नोदितम्
प्रवाहिणी सर्जनी च ग्राहिकेति वलित्रयम् ७

रसस्य रक्तत्वनिर्देशः
रसस्तु हृदयं याति समान मरुतेरितः
रञ्जितः पाचितस्तत्र पित्तेनायाति रक्तताम् ८

रक्तस्य प्राधान्यस्वरूपयोर्निर्देशः
रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम्
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ९

रसादिधातूनां पाकक्रमः
पाचिताः पित्ततापेन रसाद्या धातवः क्रमात्
शुक्रत्वं यान्ति मासेन तथा स्त्रीणां रजो भवेत् १०

गर्भोत्पत्तिनिर्देशः
कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः
गर्भःसंजायते नार्याः स जातो बाल उच्यते ११

स्त्रीपुंनपुंसकोत्पत्तौ हेतुनिर्देशः
आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत्
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी १२

बालस्यौषधमात्रानिर्देशः
बालस्य प्रथमे मासि देया भेषजरक्तिका १३

अवलेहीकृतैकैव क्षीरक्षौद्रसिताघृतैः
वर्धयेत्तावदेकैका यावद्भवति वत्सरः १४

माषैर्वृद्धिस्तदूर्ध्वं स्याद्यावत्षोडशवत्सरः

ततः स्थिरा भयेत्तावद्यावद्वर्षाणि सप्ततिः १५

ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः
मात्रेयं कल्कचूर्णानां कषायाणां चतुर्गुणा १६

आजन्म सात्म्यकर्माणि
अञ्जनं च तथा लेपः स्नानमभ्यङ्गकर्म च
वमनं प्रतिमर्शश्च जन्मप्रभृति शस्यते १७

वयोऽनुसारेण कवलादि योजना निर्देशः
कवलः पञ्चमाद्वर्षादष्टमान्नस्यकर्म च
विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनम् १८

बाल्यादीनां ह्राससमयनिर्देशः
बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ
बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् १९

वातप्रकृतिलक्षणम्
अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः २०

पित्तप्रकृतिलक्षणम्
अकालपलितैर्व्याप्तो धीमान्स्वेदी च रोषणः
स्वप्नेषु ज्योतिषां द्रष्टा पित्तप्रकृतिको नरः २१

श्लेष्मप्रकृतिलक्षणम्
गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः २२

द्विदोषत्रिदोषप्रकृतिलक्षणे
ज्ञातव्या मिश्रचिह्नैश्च द्वित्रिदोषोल्बणा नराः २३

निद्रामूर्च्छाभ्रान्तितन्द्रालक्षणानि
तमः कफाभ्यां निद्रा स्यान्मूर्च्छा पित्ततमोभवा
रजः पित्तानिलैर्भ्रान्तिस्तन्द्रा श्लेष्मतमोऽनिलैः २४

ग्लान्यालस्ययोर्लक्षणे
ग्लानिरोजःक्षयाद् दुःखादजीर्णाच्च श्रमाद्भवेत्
यः सामर्थ्येऽप्यनुत्साहस्तदालस्यमुदीर्यते २५

जृम्भालक्षणम्
चैतन्यशिथिलत्वाद्यः पीत्वैकं श्वासमुद्वमेत्
विदीर्णवदनः श्वासं जृम्भा सा कथ्यते बुधैः

छिक्कालक्षणम्
उदानप्राणयोरूर्ध्वं योगान्मौलिकफस्रवात्
शब्दः संजायते नस्तः क्षुतं तत्कथ्यते बुधैः

उद्गारलक्षणम्
उदानकोपादाहारसुस्थिरत्वाच्च यद्भवेत्
पवनस्योद्ध्र्वगमनं तमुद्गारं प्रचक्षते २८

इति श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे आहारादिगतिकथनं नाम षष्ठोऽध्यायः

अथ सप्तमोऽध्यायः
रोगगणनाध्यायः

रोगगणनाप्रतिज्ञा
रोगाणां गणना पूर्वं मुनिभिर्या प्रकीर्त्तिता
मयाऽत्र प्रोच्यते सैव तद्भेदा बहवो मताः १

ज्वरभेदाः
पञ्चविंशतिरुद्दिष्टा ज्वरास्तद्भेद उच्यते
पृथग्दोषैस्तथा द्वन्द्वभेदेन त्रिविधः स्मृतः

एकश्च सन्निपातेन तद्भेदा बहवः स्मृताः२

विषमागन्तुज्वरयोर्भेदाः
प्रायशः सन्निपातेन पञ्चस्युर्विषमज्वराः
सन्ततः सततश्चैव अन्येद्युष्कस्तृतीयकः ३

चातुर्थिकश्च पञ्च्ते कीर्त्तिता विषमज्वराः
तथाऽगन्तुज्वरोऽप्येकस्त्रयोदशविधो मतः ४

अभिचारग्रहावेशशापैरागन्तुकस्त्रिधा
श्रमाच्छेदात्क्षताद्दाहाच्चतुर्द्धाघातजो ज्वरः ५

कामाद्भीतेः शुचो रोषाद्विषादौषधगन्धतः
अभिषङ्गज्वराः षट्स्युरेवं ज्वरविनिश्चयः ६

अतीसारग्रहणीप्रवाहिकाणां भेदाः
पृथक्त्रिदोषैः सर्वैश्च शोकादामाद्भयादपि
अतीसारः सप्तधा स्याद् ग्रहणी पञ्चधा मता ७

पृथग्दोषैः सन्निपातात्तथा चामेन पञ्चमी
प्रवाहिका चतुर्द्धा स्यात्पृथग्दोषैस्तथाऽस्त्रतः ८

अजीर्णालसयोर्भेदाः
अजीर्णं त्रिविधं प्रोक्तं विष्टब्धं वायुना मतम् ९

पित्ताद्विदग्धं विज्ञेयं कफेनामं तदुच्यते
विषाजीर्णं रसादेकं दोषैः स्यादलसस्त्रिधा १०

विषूचीदण्डकालसकविलम्बिकानां भेदाः
विषूची त्रिविधा प्रोक्ता दोषैः सा स्यात्पृथक्पृथक्
दण्डकालसकश्चैव एकैव स्याद्विलम्बिका ११

अर्शश्चर्मकीलयोर्भेदाः
अर्शांसि षड्विधान्याहुर्वातपित्तकफास्त्रतः
सन्निपाताच्च संसर्गात्तेषां भेदो द्विधा स्मृतः १२

सहजोत्तरजन्मभ्यां तथा शुष्कार्द्रभेदतः
त्रिधैव चर्मकीलानि वातात्पित्तात्कफादपि १३

कृमिभेदाः
एकविंशतिभेदेन कृमयः स्युर्द्विधा च ते
बाह्यास्तथाऽभ्यन्तराः स्युस्तेषु यूका बहिश्चराः १४

लिक्षाश्चान्येऽन्तरचराः कफात्ते हृदयादकाः
अन्त्रादा उदरावेष्टाश्चुरवश्च महागुदाः १५

सुगन्धा दर्भकुसुमास्तथा रक्ताच्च मातरः
सौरसा लोमविध्वंसा रोमद्वीपा उदुम्बराः १६

केशादाश्च तथैवान्ये शकृज्जाता मकेरुकाः
लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः १७

तथाऽन्य कफरक्ताभ्यां संजातः स्नायुकः स्मृतः
व्रणस्य कृमयश्चान्ये विषमा बाह्ययोनयः १८

पाण्डुरोगकामलयोर्भेदाः
पाण्डुरोगाश्च पञ्च स्युर्वातपित्तकफैस्त्रिधा
त्रिदोषैर्मृत्तिकाभिश्च तथैका कामला स्मृता
स्यात्कुम्भकामला चैका तथैकं च हलीमकम् १९

रक्तपित्तभेदाः
रक्तपित्तं त्रिधा प्रोक्तमूर्ध्वगं कफसंभवम्
अधोगं मारुतं ज्ञेयं तद्द्वयेन द्विमार्गगम् २०

कासभेदाः
कासाः पञ्च समुद्दिष्टास्ते त्रयः स्युस्त्रिभिर्मलैः
उरः क्षताच्चतुर्थः स्यात्क्षयाद्धातोश्च पञ्चमः २१

क्षयभेदाः
क्षयाः पञ्चैव विज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते
चतुर्थः सन्निपातेन पञ्चमः स्यादुरःक्षतात् २२

शोषभेदाः
शोषाः स्युः षट्प्रकारेण स्त्रीप्रसङ्गाच्छुचो व्रणात्
अध्वश्रमाच्च व्यायामाद् बार्धक्यादपि जायते २३

श्वासभेदाः
श्वासाश्च पञ्च विज्ञेयाः क्षुद्रः स्यात्तमकस्तथा
ऊर्ध्वश्वासो महाश्वासच्छिन्नश्वासश्च पञ्चमः २४

हिक्काभेदाः
कथिताः पञ्च हिक्कास्तु तास्तु क्षुद्राऽन्नजा तथा
गम्भीरा यमला चैव महती पञ्चमी तथा २५

अग्निविकारभेदाः
चत्वारोऽग्नेर्विकाराः स्युर्विषमो वातसम्भवः
तीक्ष्णः पित्तात्कफान्मन्दो भस्मको वातपित्तयोः २६

अरोचकभेदाः
पञ्चैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा
सन्निपातान्मनस्तापात्
छर्दिभेदाः
छर्दयः सप्तधा मताः २७

त्रिभिर्दोषैः पृथक्तिस्रः कृमिभिः सन्निपातजः

घृणया च तथा स्त्रीणां गर्भाधानाच्च जायते २८

स्वरभेदाः
स्वरभेदाः षडेव स्युर्वातपित्तकफैस्त्रयः
मेदसा सन्निपातेन क्षयात्षष्ठः प्रकीर्तितः २९

तृष्णाभेदाः
तृष्णा च षड्विधा प्रोक्तावातात्पित्तात्कफादपि
त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका ३०

मूर्च्छाभ्रमनिद्रातन्द्रासंन्यासग्लानि भेदाः
मूर्च्छा चतुर्विधा ज्ञेयाः वातपित्तकफैः पृथक् ३१

चतुर्थी सन्निपातेन तथैकश्च भ्रमः स्मृतः
निद्रा तन्द्रा च संन्यासो ग्लानिश्चैकैकशः स्मृताः ३२

मदरोगभेदाः
मदाः सप्त समाख्याता वातपित्तकफैस्त्रयः
त्रिदोषैरसृजा मद्याद्विषादपि स सप्तमः ३३

मदात्ययभेदास्तदवान्तरभेदाश्च
मदात्ययश्चतुर्द्धा स्याद्वातपित्तकफादपि
त्रिदोषैरपि विज्ञेय एकः परमदस्तथा ३४

पानाजीर्णं तथा चैकं तथैकः पानविभ्रमः
पानात्ययस्तथा चैकः
दाहभेदाः
दाहाः सप्त मतास्तथा ३५

रक्तपित्तात्तथा रक्तात्तृष्णायाः पित्ततस्तथा
धातुक्षयान्मर्मघाताद्रक्तपूर्णोदरादपि ३६

उन्मादभेदाः
उन्मादाः षट् समाख्यातास्त्रिभिर्दोषैस्त्रयश्च ते
सन्निपाताद्विषाज्ज्ञेयः षष्ठो दुःखेन चेतसः ३७

भूतोन्मादभेदाः
भूतोन्मादा विंशतिः स्युस्ते देवाद्दानवादपि
गन्धर्वात्किन्नराद्यक्षात्पितृभ्यो गुरुशापतः ३८

प्रेताच्च गुह्यकाद् वृद्धात्सिद्धाद्भूतात्पिशाचतः
जलाधिदेवतायाश्च नागाच्च ब्रह्मराक्षसात्
राक्षसादपि कूष्माण्डात्कृत्या वेतालयोरपि ३९

अपस्मारभेदाः
अपस्मारश्चतुर्द्धा स्यात्समीरात्पित्ततस्तथा
श्लेष्मणोऽपि तृतीयः स्याच्चतुर्थः सन्निपाततः ४०

आमवातभेदाः
चत्वारश्चामवाताः स्युर्वातपित्तकफैस्त्रिधा
चतुर्थः सन्निपातेन
शूलभेदाः
शूलान्यष्टौ बुधा जगुः ४१

पृथगदोषैस्त्रिधा द्वन्द्वभेदेन त्रिविधान्यपि
आमेन सप्तमं प्रोक्तं सन्निपातेन चाष्टमम् ४२

परिणामशूलभेदाः
परिणामभवं शूलमष्टधा परिकीर्त्तितम्
मलैर्या शूलसंख्या स्यात्तैरेव परिणामजम् ४३

अन्नद्रवजरत्पित्तशूले
अन्नद्रवभवं शूलं जरत्पित्तभवं तथा

एकैकं गणितं सुज्ञैः
उदावर्त्तभेदाः
उदावर्त्तास्त्रयोदश ४४

एकः क्षुन्निग्रहात्प्रोक्तस्तृष्णारोधाद् द्वितीयकः ४५

निद्राघातात्तृतीयः स्याच्चतुर्थः श्वासनिग्रहात्
छर्दिरोधात्पञ्चमः स्यात्षष्ठः क्षवथुनिग्रहात् ४६

जृम्भारोधात्सप्तमः स्यादुद्गारग्रहतोऽष्टमः
नवमः स्यादश्रुरोधाद्दशमः शुक्रधारणात् ४७

मूत्ररोधान्मलस्यापि रोधाद्वातविनिग्रहात्
उदावर्त्तास्त्रयश्चैते घोरोपद्रवकारकाः ४८

आनाहभेदौ
आनाहोद्विविधो ज्ञेय एकः पक्वाशयोद्भवः
आमाशयोद्भवश्चान्यः प्रत्यानाहः स कथ्यते ४९

उरोग्रहहृद्रोगयोर्भेदाः
उरोग्रहस्तथा चैको हृद्रोगाः पञ्च कीर्त्तिताः
वातादिभिस्त्रयः प्रोक्ताश्चतुर्थः सन्निपाततः
पञ्चमः क्रिमिसञ्जातः
उदररोगभेदाः
तथाऽष्टावुदराणि च ५०

वातात्पित्तात्कफात्त्रीणि त्रिदोषेभ्यो जलादपि
प्लीह्नः क्षताद्बद्धगुदादष्टमं परिकीर्त्तितम् ५१

गुल्मभेदाः
गुल्मास्त्वष्टौ समाख्याता वातपित्तकफैस्त्रयः ५२

द्वन्द्वभेदास्त्रयः प्रोक्ताः सप्तमः सन्निपाततः
रक्तादष्टमकः ख्यातः
मूत्राघातभेदाः
मूत्राघातास्त्रयोदश ५३

वातकुण्डलिका पूर्वा वाताष्ठीला ततः परा
वातबस्तिस्तृतीयः स्यान्मूत्रातीतश्चतुर्थकः ५४

पञ्चमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः
मूत्रोत्सर्गः सप्तमः स्यान्मूत्रग्रन्थिस्तथाऽष्टमः ५५

मूत्रशुक्रंतु नवमं विड्घातो दशमः स्मृतः
मूत्रसादश्चोष्णवातोबस्तिकुण्डलिका तथा
त्रयोऽप्येते मूत्रघाताः पृथग्घोराः प्रकीर्त्तिताः ५६

मूत्रकृच्छ्रभेदाः
मूत्रकृच्छ्राणि चाष्टौ स्युर्वातपित्तकफैस्त्रिधा ५७

सन्निपाताचतुर्थं स्याच्छुक्रकृच्छ्रं च पञ्चमं
विट्कृच्छ्रं षष्ठमाख्यातं घातकृच्छ्रं च सप्तमम्
अष्टमं चाश्मरीकृच्छ्रं
अश्मरीभेदाः
चतुर्द्धा चाश्मरी मता ५८

वातात्पित्तात्कफाच्छुक्रात् तथा मेहाश्च विंशतिः ५९

कफजमेहभेदाः
इक्षुमेहः सुरामेहः पिष्टमेहश्च सान्द्रकः
शुक्रमेहोदकाख्यौ च लालामेहश्च शीतकः
सिकताख्यः शनैर्मेहो दशैते कफसम्भवाः ६०

पित्तजमेहभेदाः
मञ्जिष्ठाख्यो हरिद्राख्यो नीलमेहश्च रक्तकः
कृष्णमेहः क्षारमेहः षडेते पित्तसम्भवाः ६१

वातिकमेहभेदाः
हस्तिमेहो वसामेहो मज्जामेहो मधुप्रभः
चत्वारो वातजा मेहा इति मेहाश्च विंशतिः ६२

सोमरोगप्रमेहपिटिकयोर्भेदः
सोमरोगस्तथा चैकः प्रमेहपिटिका दश
शराविका कच्छपिका पुत्रिणी विनताऽलजी ६३

मसूरिका सर्षपिका जालिनी च विदारिका
विद्रधिश्च दशैताः स्युः पिटिका मेहसम्भवाः ६४

मेदोदोषशोथरोगभेदाः
मेदो दोषस्तथा चैकः शोथ रोगा नव स्मृताः
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि ६५

वृद्धिरोगभेदाः
वृद्धयः सप्त गदिता वातात्पित्तात्कफेन च
रक्तेन मेदसा मूत्रादन्त्रवृद्धिश्च सप्तमी ६६

अण्डवृद्धि गण्डमालिका गण्डालजीरोगाः
अण्डवृद्धिस्तथा चैका तथैका गण्डमालिका
गण्डालजीति चैका स्याद्
ग्रन्थिभेदाः
ग्रन्थयो नवधा मताः ६७

त्रिभिर्दोषैस्त्रयो रक्ताच्छिराभिर्मेदसो व्रणात्
अस्थ्ना मांसेन नवमः

अर्बुदभेदाः
षड्विधं स्यात्तथाऽबुदम् ६८

वातात्पित्तात्कफाद्रक्तान्मांसादपि च मेदसः ६९

श्लीपदभेदाः
श्लीपदं च त्रिधा प्रोक्तं वातात्पित्तात्कफादपि ७०

विद्रधिभेदाः
विद्रधिः षड्विधः ख्यातो वातपित्तकफैस्त्रयः
रक्तात् क्षतात् त्रिदोषैश्च
व्रणभेदाः
व्रणाः पञ्चदशोदिताः ७१

तेषां चतुर्द्धा भेदाः स्युरागन्तुर्देहजस्तथा
शुद्धो दुष्टश्च विज्ञेयस्तत्संख्या कथ्यते पृथक्
वातव्रणः पित्तजश्च कफजो रक्तजो व्रणः ७२

वातपित्तभवश्चान्यो वातश्लेष्मभवस्तथा
तथा पित्तकफाभ्यां च सन्निपातेन चाष्टमः ७३

नवमो वातरक्तेन दशमो रक्तपित्ततः
श्लेष्मरक्तभवश्चान्यो वातपित्तासृगुद्भवः ७४

वातश्लेष्मासृगुत्पन्नः पित्तश्लेष्मास्रसंभवः
सन्निपातासृगुद्भूत इति पञ्चदश व्रणाः ७५

सद्योव्रणभेदाः
सद्योव्रणस्त्वष्टधा स्यादविक्लृप्तविलम्बितौ
छिन्नभिन्नप्रचलिता घृष्टविद्धनिपातिताः ७६

कोष्ठभेदभेदौ
कोष्ठभेदो द्विधा प्रोक्तश्छिन्नान्त्रो निःसृतान्त्रकः ७७

अस्थिभङ्गभेदाः
अस्थिभङ्गोऽष्टधा प्रोक्तो भग्नपृष्ठविदारितौ
विवर्त्तितश्च विश्लिष्टस्तिर्यक्क्षिप्तस्त्वधोगतः
ऊर्ध्वगः संधिभग्नश्च
वह्निदग्धभेदाः
वह्निदग्धश्चतुर्विधः ७८

प्लुष्टो विदग्धो दुर्दग्धः सम्यग्दग्धः प्रकीर्त्तितः ७९

नाडीव्रणभेदाः
नाड्यः पञ्च समाख्याता वातपित्तकफैस्त्रिधा
त्रिदोषैरपि शल्येन
भगन्दरभेदाः
तथाऽष्टौ स्युर्भगन्दराः ८०

शतपोनस्तु पवनादुष्ट्रग्रीवश्च पित्ततः
परिस्रावो कफाज्ज्ञेय ऋजुर्वातकफोद्भवः ८१

परिक्षेपी मरुत्पित्तादर्शोजः कफपित्ततः
आगन्तुजातश्चोन्मार्गी शङ्खावर्तस्त्रिदोषजः ८२

उपदंशभेदाः
मेढ्रे पञ्चोपदंशाः स्युर्वातपित्तकफैस्त्रिधा
सन्निपातेन रक्ताच्च
शूकामयभेदाः
मेढ्रे शूकामयास्तथा
चतुर्विंशतिराख्याता लिङ्गार्शो ग्रथितं तथा ८३

निवृत्तमवमन्थश्च मृदितं शतपोनकः
ग्रन्थीलिका सर्षपिका त्वक्पाकश्चावपाटिका ८४

मांसपाकः स्पर्शहानिर्निरुद्धमणिरुत्तमा
मांसार्बुदं पुष्करिका संमूढपिडिकाऽलजी ८५

रक्तार्बुदं विद्रधिश्च कुम्भिकातिलकालकः
निरुद्धप्रकशः प्रोक्तस्तथैव परिवर्त्तिका ८६

कुष्ठभेदाः
कुष्ठान्यष्टादशोक्तानि वातात् कापालिकं भवेत्
पित्तेनोदुम्बरं प्रोक्तं कफान्मण्डलचर्चिके ८७

मरुत्पित्तादृष्यजिह्वं श्लेष्मवाताद्विपादिका
तथा सिध्मैककुष्ठं च किटिभं चालसं तथा ८८

कफपित्तात् पुनर्दद्रुः पामा विस्फोटकं तथा
महाकुष्ठं चर्मदलं पुण्डरीकं शतारुकम् ८९

त्रिदोषैः काकणं ज्ञेयं तथाऽन्यच्छिवत्रसंज्ञितम्
तथा वातेन पित्तेन श्लेष्मणा च त्रिधा भवेत् ९०

क्षुद्ररोगभेदाः
क्षुद्ररोगाः षष्टिसंख्यास्तेष्वादौ शर्करार्बुदम्
इन्द्रवृद्धा पनसिका विवृताऽन्धालजी तथा ९१

वराहदंष्ट्रो वल्मीकं कच्छपी तिलकालकः
गर्दभी रकसा चैव यवप्रख्या विदारिका ९२

कदरं मषकश्चैव नीलिका जालगर्दभः
इरिवेल्ली जतुमणिर्गुदभ्रंशोऽग्निरोहिणी ९३

सन्निरुद्धगुदः कोठः कुनखोऽनुशयी तथा
पद्मिनीकण्टकश्चिप्पमलसो मुखदूषिका ९४

कक्षावृषणकच्छूश्च गन्धः पाषाणगर्दभः
राजिका च तथा व्यङ्गश्चतुर्द्धा परिकीर्त्तितः ९५

वातात्पित्तात्कफाद्रक्तादित्युक्तं व्यङ्गलक्षणम्
विस्फोटाः क्षुद्ररोगेषु तेऽष्टधा परिकीर्त्तिताः ९६

पृथग्दोषैस्त्रयो द्वन्द्वैस्त्रिविधः सप्तमोऽसृजः
अष्टमः सन्निपातेन क्षुद्ररुक्षु मसूरिका ९७

चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा
द्वन्द्वजा विविधा प्रोक्ता सन्निपातेन सप्तमी ९८

अष्टमी त्वग्गता ज्ञेया नवमी रक्तजा स्मृता
दशमी मांससञ्जाता चतस्त्रोऽन्याश्च दुस्तराः
मेदोऽस्थिमज्जाशुक्रस्थाः क्षुद्ररोगा इतीरिताः ९९

विसर्पभेदाः
विसर्परोगो नवधा वातपित्तकफैस्त्रिधा १००

त्रिधा स द्वन्द्वभेदेन सन्निपातेन सप्तमः
अष्टमो वह्निदाहेन नवमश्चाभिघातजः १०१

उदर्दशीतपित्तामयौ
तथैकः श्लेष्मपित्ताभ्यामुदर्दः परिकीर्त्तितः
वातपित्तेन चैकस्तु शीतपित्तामयः स्मृतः १०२

अम्लपित्तभेदाः
अम्लपित्तं त्रिधा प्रोक्तं वातेन श्लेष्मणा तथा

तृतीयं श्लेष्मवाताभ्याम्
वातरक्तभेदाः
वातरक्तं तथाऽष्टधा १०३

वाताधिक्येन पित्ताच्च कफाद्दोषत्रयेण च
रक्ताधिक्येन दोषाणां द्वन्द्वेन त्रिविधः स्मृतः १०४

वातरोगभेदाः
अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः
आक्षेपको हनुस्तम्भ ऊरुस्तम्भः शिरोग्रहः १०५

बाह्यायामोऽन्तरायामः पार्श्वशूलं कटिग्रहः
दण्डापतानकः खल्ली जिह्वास्तम्भस्तथाऽदितम् १०६

पक्षाघातः क्रोष्टुशीर्षो मन्यास्तम्भश्च पङ्गुता
कलायखञ्जता तूनी प्रतितूनी च खञ्जता १०७

पादहर्षो गृध्रसी च विश्वाची चापबाहुकः
अपतानो व्रणायामो वातकण्टोऽपतन्त्रकः १०८

अङ्गभेदोऽङ्गशोषश्च मिन्मिनत्वं च गद्गदः
प्रत्यष्ठीलाऽष्ठीलिका च वामनत्वं च कुब्जता १०९

अङ्गपीडाऽङ्गशूलं च संकोचस्तम्भरूक्षताः
अङ्गभङ्गोऽङ्गविभ्रंशो विड्ग्रहो बद्धविट्कता ११०

मूकत्वमतिजृम्भा स्यादत्युद्गारोऽन्त्रकूजनम्
वातप्रवृत्तिः स्फुरणं शिराणां पूरणं तथा १११

कम्पः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता
निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः ११२

अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः
अनवस्थितचित्तत्वं काठिन्यं विरसास्यता ११३

कषायवक्त्रताऽध्मानं प्रत्याध्मानं च शीतता
रोमहर्षश्च भीरुत्वं तोदः कण्डू रसाज्ञता
शब्दाज्ञता प्रसुप्तिश्च गन्धाज्ञत्वं दृशः क्षयः ११४

पित्तरोगभेदाः
अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिताः ११५

धूम्रोद्गारो विदाहः स्यादुष्णाङ्गत्वं मतिभ्रमः
कान्तिहानिः कण्ठशोषो मुखशोषोऽल्पशुक्रता ११६

तिक्तास्यताऽम्लवक्त्रत्वं स्वेदस्रावोऽङ्गपाकता
क्लमो हरितवर्णत्वमतृप्तिः पीतगात्रता ११७

रक्तस्रावोऽङ्गदरणं लोहगन्धास्यता तथा
दौर्गन्ध्यं पीतमूत्रत्वमरतिः पीतविट्कता ११८

पीतावलोकनं पीतनेत्रता पीतदन्तता
शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता ११९

कोपश्च गात्रसादश्च भिन्नविट्कत्वमन्धता
उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च १२०

तमसो दर्शनं पीतमण्डलानां च दर्शनम्
निःसहत्वं च पित्तस्य चत्वारिंशद्रुजः स्मृताः १२१

कफरोगभेदाः
कफस्य विंशतिः प्रोक्ता रोगास्तन्द्राऽतिनिद्रता
गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता १२२

श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता
श्वेताङ्गवर्णता शैत्यमुष्णेच्छा तिक्तकामिता १२३

मलाधिक्यं च शुक्रस्य बाहुल्यं बहुमूत्रता
आलस्यं मन्दबुद्धित्वं तृप्तिर्घर्घरवाक्यता
अचैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः १२४

रक्तरोगभेदाः
रक्तस्य च दश प्रोक्ता व्याधयस्तेषु गौरवम् १२५

रक्तमण्डलता रक्तनेत्रत्वं रक्तमूत्रता
रक्तनिष्ठीवनं रक्तपिटिकानां च दर्शनम्
औष्ण्यं च पूतिगन्धित्वं पीडा पाकश्च जायते १२६

मुखरोगभेदाः
चतुःसप्ततिसंख्याका मुखरोगास्तथोदिताः १२७

ओष्ठरोगभेदाः
तेष्वोष्ठरोगा गणिता एकादशमिता बुधैः
वातपित्तकफैस्त्रेधा त्रिदोषैरसृजा तथा १२८

क्षतान्मांसार्बुदं चैव खण्डोष्ठं च जलार्बुदम्
मेदोऽबुदं चार्बुदं च रोगा एकादशौष्ठजाः १२९

दन्तरोगभेदाः
दन्तरोगा दशाख्याता दालनः कृमिदन्तकः
दन्तहर्षः करालश्च दन्तचालश्च शर्करा
अधिदन्तः श्यावदन्तो दन्तभेदः कपालिका १३०

दन्तमूलरोगभेदाः
तथा त्रयोदशमिता दन्तमूलामयाः स्मृताः १३१

शीतादोपकुशौ द्वौ तु दन्तविद्रधिपुप्पुटौ
अधिमांसो विदर्भश्च महासौषिरसौषिरौ १३२

तेष्वेव गतयः पञ्च वातात्पित्तात्कफादपि
सन्निपाताद् गतिश्चान्या रक्तनाडी च पञ्चमी १३३

जिह्वारोगभेदाः
तथा जिह्वाऽमयाः षट् स्युर्वातपित्तकफैस्त्रिधा
अलासश्च चतुर्थः स्यादधिजिह्वश्च पञ्चमः १३४

षष्ठश्चैवोजपजिह्वः स्यात्
तालुरोगभेदाः
तथाऽष्टौ तालुजा गदाः १३५

अर्बुदं तालुपिटिका कच्छपी तालुसंहतिः
गलशुण्डी तालुशोषस्तालुपाकश्च पुप्पुटः १३६

गलरोगभेदाः
गलरोगास्तथा ख्याता अष्टादशमिता बुधैः
वातरोहिणिका पूर्वं द्वितीया पित्तरोहिणी
कफरोहिणिका प्रोक्ता त्रिदोषैरपि रोहिणी १३७

मेदोरोहिणिका वृन्दो गलौघो गलविद्रधिः
स्वरहा तुण्डिकेरी च शतघ्नी शालुकोऽबुदम् १३८

गलायुर्वलयश्चापि वाताद् गण्डः कफात्तथा
मेदोगण्डस्तथैव स्यादित्यष्टादश कण्ठजाः १३९

मुखान्तर्गतरोगभेदाः
मुखान्तःसम्भवा रोगा अष्टौ ख्याता महर्षिभिः
मुखपाको भवेद्वातात्पित्तात्तद्वत्कफादपि १४०

रक्ताच्च सन्निपाताच्च पूत्यास्योर्ध्वगुदावपि
अर्बुदं चेति मुखजाश्चतुः सप्ततिरामयाः १४१

कर्णरोगभेदाः
कर्णरोगाः समाख्याता अष्टादशमिता बुधैः
वातात्पित्तात्कफाद्रक्तात्सन्निपाताच्च विद्रधिः १४२

शोथोऽबुदं पूतिकर्णः कर्णार्शः कर्णहल्लिका
बाधिर्यं तन्त्रिका कण्डूः शष्कुली कृमिकर्णकः
कर्णनादः प्रतीनाह इत्यष्टादश कर्णजाः १४३

कर्णपालीरोगभेदाः
कर्णपालीसमुद्भूता रोगाः सप्त इहोदिताः १४४

उत्पातः पालिशोषश्च विदारी दुःखवर्द्धनः
परिपोटश्च लेही च पिप्पली चेति संस्मृतः १४५

कर्णमूलरोगभेदाः
कर्णमूलामयाः पञ्च वातात्पित्तात्कफादपि
सन्निपाताच्च रक्ताच्च
नासारोगभेदाः
तथा नासाभवा गदाः १४६

अष्टादशैव संख्याताः प्रतिश्यायस्तु तेष्वपि
वातात्पित्तात्कफाद्रक्तात्सन्निपातेन पञ्चमः १४७

अपीनसः पूतिनासो नासाऽशो भ्रंशथुः क्षवः
नासाऽनाहः पूतिरक्तमर्बुदं दुष्टपीनसम्
नासाशोषो घ्राणपाकः पूयस्त्रावश्च दीप्तकः १४८

शिरोरोगभेदाः

तथा दश शिरोरोगा वातेनार्द्धावभेदकः
शिरस्तापश्च वातेन पित्तपीडा तृतीयका १४९

चतुर्थी कफजा पीडा रक्तजा सन्निपातजा
सूर्यावर्त्ताच्छिरः कम्पात्क्रिमिभिः शङ्खकेन च १५०

कपालरोगभेदाः
तथा कपालरोगाः स्युर्नव तेषूपशीर्षकम्
अरुंषिका विद्रधिश्च दारुणं पिटिकाऽबुदम्
इन्द्रलुप्तं च खलितं पलितं चेति ते नव १५२

नेत्ररोगभेदास्तत्रादौ वर्त्मरोगभेदाः
तथा नेत्रभवाः ख्याताश्चतुर्नवतिरामयाः
तेषु वर्त्मगदाः प्रोक्ताश्चतुर्विंशतिसंज्ञकाः १५३

कृच्छ्रोन्मीलः पद्मपातः कफोत्क्लिष्टश्च लोहितः
अरुङ्निमेषः कथितो रक्तोत्क्लिष्टः कुकूणकः १५४

पद्मार्शः पद्मरोधश्च पित्तोत्क्लिष्टश्च पोथकी
क्लिष्टवर्त्मा च बहलः पद्मोत्सङ्गस्तथाऽबुदम् १५५

कुम्भिका सिकतावर्त्म लगणोऽञ्जननामिका
कर्दमः श्याववर्त्मा च बिसवर्त्मा तथाऽलजी
उत्क्लिष्टवर्त्मेति गदाः प्रोक्ता वर्त्मसमुद्भवाः १५६

नेत्रसन्धिरोगभेदाः
नेत्रसन्धिसमुद्भूता नव रोगाः प्रकीर्त्तिताः
जलस्त्रावः कफस्त्रावो रक्तस्त्रावश्च पर्वणी १५७

पूयस्त्रावः क्रिमिग्रन्थिरुपनाहस्तथाऽलजी
पूयालस इति प्रोक्ता रोगा नयनसन्धिजाः १५८

नेत्रशुक्लगतरोगभेदाः
तथा शुक्लगता रोगा बुधैः प्रोक्तास्त्रयोदश १५९

शिरोत्पातः शिराहर्षः शिराजालं च शुक्तिका
शुक्लार्म चाधिमांसार्म प्रस्तार्यर्म च पिष्टकः १६०

शिराजपिटिका चैव कफग्रथितकोऽजुनः
स्नाय्वर्म शोणितार्म स्यादिति शुक्लगता गदाः १६१

नेत्रकृष्णगतरोगभेदाः
तथा कृष्णसमुद्भूताः पञ्च रोगाः प्रकीर्तिताः
शुद्धशुक्रं शिराशुक्रं क्षतशुक्रं तथाऽजका
शिरासङ्गश्च सर्वेऽपि प्रोक्ताः कृष्णगता गदाः १६२

काचरोगभेदाः
काचं तु षड्विधं ज्ञेयं वातात्पित्तात्कफादपि
सन्निपाताच्च रक्ताच्च षष्ठं संसर्गसम्भवम् १६३

तिमिररोगभेदाः
तिमिराणि षडेव स्युर्वातपित्तकफैस्त्रिधा
संसर्गेण च रक्तेन षष्ठं स्यात्सन्निपाततः १६४

लिङ्गनाशरोगभेदाः
लिङ्गनाशः सप्तधा स्याद्वातात्पित्तात्कफेन च
त्रिदोषैरुपसर्गेण संसर्गेणासृजा तथा १६५

दृष्टिमण्डलरोगभेदाः
अष्टधा दृष्टिरोगाः स्युस्तेषु पित्तविदग्धकम्
अम्लपित्तविदग्धं च तथैवोष्णविदग्धकम् १६६

नकुलान्ध्यं धूसरान्ध्यं रात्र्यान्ध्यं ह्रस्वदृष्टिकः

गम्भीरदृष्टिरित्येते रोगा दृष्टिगता मताः १६७

अभिष्यन्दरोगभेदाः
अभिष्यन्दाश्च चत्वारो रक्ताद्दोषैस्त्रिभिस्तथा १६८

अधिमन्थरोगभेदाः
चत्वारश्चाधिमन्थाः स्युर्वातपित्तकफास्त्रतः १६९

सर्वाक्षिरोगभेदाः
सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु वातविपर्ययः
अल्पशोफोऽन्यतोवातस्तथा पाकात्ययः स्मृतः
शुष्काक्षिपाकश्च तथा शोफोऽध्युषित एव च
हताधिमन्थ इत्येते रोगाः सर्वाक्षिसम्भवाः १७०

पुंस्त्वरोगभेदाः
पुंस्त्वदोषास्तु पञ्चैव प्रोक्तास्तत्रेर्ष्यकः स्मृतः
आसेक्यश्चैव कुम्भीकः सुगन्धिः षण्ढसंज्ञकः १७१

शुक्रदोषभेदाः
शुक्रदोषास्तथाऽष्टौ स्युर्वातात्पित्तात्कफेन च
कुणपं श्लेष्मवाताभ्यां पूयाभं श्लेष्मपित्ततः १७२

क्षीणं च वातपित्ताभ्यां ग्रन्थिलं श्लेष्मवाततः
मलाभं सन्निपाताच्च शुक्रदोषा इतीरिताः १७३

अथ स्त्रीरोगनामानि
तत्रार्त्तवदोषभेदाः
अथ स्त्रीरोगनामानि प्रोच्यन्ते पूर्वशास्त्रतः १७४

अष्टावार्त्तवदोषाः स्युर्वातपित्तकफैस्त्रिधा
पूयाभं कुणपं ग्रन्थिं क्षीणं मलसमं तथा १७५

रक्तप्रदरभेदाः
तथा च रक्तप्रदरं चतुर्विधमुदाहृतम्
वातपित्तकफैस्त्रेधा चतुर्थं सन्निपाततः १७६

योनिरोगभेदाः
विंशतिर्योनिरोगाः स्युर्वातात्पित्तात्कफादपि
सन्निपाताच्च रक्ताच्च लोहितक्षयतस्तथा १७७

शुष्का च वामिनी चैव खण्डिताऽन्तर्मुखी तथा
सूचीमुखी विप्लुता च जातघ्नी च परिप्लुता १७८

उपप्लुता प्राक्चरणा महायोनिश्च कर्णिनी
स्यान्नन्दा चातिचरणा योनिरोगा इतीरिताः १७९

योनिकन्दभेदाः
चतुर्विधं योनिकन्दं वातपित्तकफैस्त्रिधा
चतुर्थं सन्निपातेन
गर्भरोगभेदाः
तथाष्टौ गर्भजा गदाः १८०

उपविष्टकगर्भः स्यात्तथा नागोदरः स्मृतः
मक्कल्लो मूढगर्भश्च विष्कम्भो गूढगर्भकः
जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः १८१

स्तनरोगभेदाः
पञ्चैव स्तनरोगाः स्युर्वातात्पित्तात्कफादपि
सन्निपातात्क्षताच्चैव
स्तन्यरोगभेदाः
तथा स्तन्योद्भवा गदाः १८२

बालरोगेषु कथिताः

स्त्रीदोषभेदाः
स्त्रीदोषाश्चत्रयः स्मृताः १८३

अदत्तपुरुषोत्पन्नः सपत्नीविहितस्तथा
दैवाज्जातस्तृतीयस्तु
सूतिकारोगभेदाः
तथा ये सूतिकागदाः १८४

ज्वरादयश्चिकित्स्यास्ते यथादोषं यथाबलम् १८५

बालरोगभेदाः
द्वाविंशतिर्बालरोगास्तेषु क्षीरभवास्त्रयः
वातात्पित्तात्कफाच्चैव दन्तोद्भेदश्चतुर्थकः
दन्तघातो दन्तशब्दोऽकालदन्ताऽहिपूतनम् १८६

मुखपाको मुखस्रावो गुदपाकोपशीर्षके
पद्मारुणस्तालुकण्टो विच्छिन्नं पारिगर्भिकः १८७

दौर्बल्यं गात्रशोषश्च शय्यामूत्रं कुकूणकः
रोदनं चाजगल्ली स्यादिति द्वाविंशतिः स्मृताः १८८

बालग्रहभेदाः
तथा बालग्रहाः ख्याता द्वादशैव मुनीश्वरैः
स्कन्दग्रहो विशाखः स्याच्छ्वग्रहश्च पितृग्रहः १८९

नैगमेयग्रहस्तद्वच्छकुनिः शीतपूतना
मुखमण्डनिका तद्वत्पूतना चान्धपूतना
रेवती चैव सङ्ख्याता तथा स्याच्छुष्करेवती १९०

चरणभेदरोगभेदाः
तथा चरणभेदास्तु वातरक्तादिकाश्च ये

द्विचत्वारिंशदुक्तास्ते रोगेष्वेव मुनीश्वरैः
वातादिदोषभेदाः
द्विषष्टिर्दोषभेदाः स्युः सन्निपातादिकाश्च ये
तेऽपि रोगेषु गणिताः पृथक्प्रोक्ता न ते क्वचित् १९२

पञ्चकर्मरोगभेदाः
हीनमिथ्याऽतियोगानां भेदैः पञ्चदशोदिताः
पञ्चकर्मभवा रोगा रोगेष्वेव प्रकीर्त्तिताः १९३

स्नेहादीनां हीनादियोगजरोगभेदाः
स्नेहस्वेदौ तथा धूमो गण्डूषोऽञ्जनतर्पणे
षोढा अष्टादशैतज्ञास्ताश्च रोगेषु लक्षिताः १९४

शीतोष्णशल्यक्षारोपद्रवाः
शीतोपद्रव एकः स्यादेकश्चोष्णोद्भवो मतः
शल्योपद्रव एकश्च क्षाराच्चैकः स्मृतस्तथा १९५

विषस्य विविधा भेदाः
स्थावरं जङ्गमं चैव कृत्रिमं च त्रिधा विषम् १९६

तेषां च कालकूटाद्यैर्नवधा स्थावरं विषम्
जङ्गमं बहुधा प्रोक्तं तत्र लूता भुजङ्गमाः १९७

वृश्चिका मूषिकाः कीटाः प्रत्येकं ते चतुर्विधाः
दंष्ट्राविषं नखविषं बालशृङ्गास्थिभिस्तथा १९८

मूत्रात्पुरीषाच्छुक्राच्च दृष्टेर्निश्वासतस्तथा
लालायाः स्पर्शतस्तद्वत्तथा शङ्काविषं मतम् १९९

कृत्रिमं द्विविधं प्रोक्तं गरदूषीविभेदतः
सप्तधातुविषं ज्ञेयं तथा सप्तोपधातुजम् २००

तथैवोपविषेभ्यश्च जातं सप्तविधं मतम्
दुष्टनीरविषं चैकं तथैकं दिग्धजं विषम् २०१

कपिकच्छुभवा कण्डूर्दुष्टनीरभवा तथा
तथा सूरणकण्डूश्च शोथो भल्लातजस्तथा २०२

मदभेदाः
मदश्चतुर्विधश्चान्यः पूगभङ्गाऽक्षकोद्रवैः
चतुर्विधोऽन्यो द्रव्याणां फलत्वङ्मूलपत्रजः २०३

उपसंहारः
इति प्रसिद्धा गणिता ये किलोपद्रवा भुवि
असङ्ख्याश्चापरे धातुमूलजीवादिसम्भवाः

इति शार्ङ्गधरसंहितायां पूर्वखण्डे रोगगणनानामसप्तमोऽध्यायः

इति प्रथमखण्डं समाप्तम्